# O. P. JINDAL SCHOOL, RAIGARH (CG) 496 001, INDIA
Phone: 07762-227042, 227293, (Extn. 227001 - 49801, 02, 04, 06, 09); Fax: 07762-262613; website: www.opjsrgh.in; e-mail: opjsraigarh@jspl.com

## संस्कृतम् - सम्प्रेषणात्मकम्

**अवधिः होरात्रयम्** **कक्षा – नवमी** **पूर्णाङ्काः - 80**

**निर्देशाः -**

(i) प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।
- खण्डः (क) अपठित-अवबोधनम् - **10 अङ्काः**
- खण्डः (ख) रचनात्मक – कार्यम् - **15 अङ्काः**
- खण्डः (ग) अनुप्रयुक्त-व्याकरणम् - **25 अङ्काः**
- खण्डः (घ) पठित– अवबोधनम् - **30 अङ्काः**

(ii) सर्वे प्रश्नाः अनिवार्याः सन्ति ।
(iii) प्रश्नानाम् उत्तराणि खण्डक्रमानुसारं क्रमेणैव लेखनीयानि ।
(iv) उत्तराणि संस्कृतेनैव लेखनीयानि ।
(v) प्रश्नसंख्या अवश्यमेव लेखनीया ।

## खण्ड – क (अपठितावबोधनम् – 10 अङ्काः)

प्र. 1- **अधोलिखितं अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत–**

'दहेज' अथवा 'दायज' इति शब्दः समाजस्य एकः कलंकः अस्ति। विवाहः जीवनस्य एका अमूल्या निधिरस्ति। विवाहस्य जीवनेन सह अभिन्न सम्बन्धः अस्ति। दहेजस्यकारणेन निर्धनानां तु कन्यकाः बहुकालम् अविवाहिताः भवन्ति। इयं प्रथा अस्माकं देशे जनसामान्ये पुरा प्रचलिता नासीत्। मध्यकाले सामन्तयुगे राजानः स्वकन्याभ्यः विवाहेषु अपारधनराशिं सुखसाधनानि च दातुं प्रारभन्त। अद्य तु इयं प्रथा अस्माकं समाजे दृढ परम्परा विद्यते। दहेजस्य ब्रह्मराक्षसः स्वबाहुपाशे जनसाधारणं संनिगृह्य अट्टहासं करोति। एकतः पिता स्वकन्यां महादानमिव वराय यच्छति अपरतः पुनः रुप्यकाणि अपि दीयन्ते। किमर्थं एतावान् महाराशिः शुल्कं वा कन्यायाः पित्रा वरपित्रे दीयते, अयमेव प्रश्नः।

I. **एकपदेन उत्तरत -** (1/2x4=2)
(i) निर्धनानां कन्यकाः कीदृश्यः भवन्ति ?
(ii) कः स्वकन्यां महादानमिव वराय यच्छति ?
(iii) किम् जीवनस्य अमूल्या निधिरस्ति ?
(iv) का प्रथा अस्माकं देशे पुरा प्रचलिता नासीत् ?

II. **पूर्णवाक्येन उत्तरत -**
(i) दहेजस्य ब्रह्मराक्षसः किम् कृत्वा अट्टहासं करोति ? (2x2=4)
(ii) मध्यकाले राजानः किम् प्रारभन्त ?

III. **यथानिर्देशं उत्तरत -**
(i) 'अस्ति' पदस्य अर्थे अनुच्छेदे कः शब्दः आगतः? (1/2x4=2)
(अ) आसीत् (ब) करोति
(स) विद्यते (द) दीयते
(ii) 'यच्छति' इति पदस्य अत्र किं कर्तृपदम् ?
(अ) राजानः (ब) पिता
(स) ब्रह्मराक्षसः (द) कन्यकां
(iii) 'अधुना' इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम् ?
(अ) अभिन्नः (ब) इव
(स)पुरा (द) इयं
(iv) अनुच्छेदे 'ब्रह्मराक्षसः' कस्मै कथितम् ?
(अ) दायजाय (ब) कलंकाय
(स) शब्दाय (द) समाजाय

IV. **अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत ।** (2x1=2)

## खण्ड – ख (रचनात्मककार्यम् – 15 अङ्काः)

प्र.2 - **भवत्याः नाम लतिका । भवती 'सुरवाणीसन्देशः' इति पत्रिकां पठति । ग्राहकशुल्के समाप्ते सति अग्रिमवर्षार्थं शुल्कप्रेषणाय अत्र लिखिते पत्रे मञ्जूषातः रिक्तस्थानानि पूरयित्वा पत्रं पुनः उत्तरपुस्तिकायां लिखत ।** (1/2x10=5)

८८, आदर्शनगरम्,
नवदेहली-११००३३
दिनांकः xx.०९.२०१७

(1)……………सम्पादकमहोदय,

सादरम् .........(2).........।

अहम् 'सुरवाणीसन्देशः' इति...... (3)……..नियमिता पाठिका अस्मि । मम......( 4)……..अस्य वर्षस्य दिसम्बरमासे समाप्तम् भवति । अतः अनेन पत्रेण......(5)…….वार्षिकं ग्राहकशुल्कं ११०/- रुप्यकाणि स्टेट बैंक आफ इण्डिया' इति द्वारा.......(6)……बैंक ड्राफ्ट संख्या ४००५६/१४/०९/२०१६ दिनांकितं .......... (7) ... ........करोमि । कृपया प्राप्तिपत्रं...........(8)……….अनुगृहीतां कुर्वन्तु ।

...........(9)……… ।

........(10)........., संस्कृतोपासिका,
लतिका

| |
|---|
| पत्रिकायाः, सधन्यवादम्, सार्धम्, आदरणीय, संलग्नम्, ग्राहकशुल्कम्, भवदीया, प्रेषयित्वा, वन्दे, प्रदेयम् । |

प्र.3 - **मञ्जूषायाः प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतभाषायाम् लिखत-** (2x5=10)



| |
|---|
| तीर्थस्थलस्य, जन्म, स्नानम्, शोभनः, स्थलम्, देवालयाः, नमन्ति, एतत् चित्रम्, सन्ति,तीर्थे, कुर्वन्ति, गंगाजले, नद्यां, अनेके, रमणीयम् । |

अथवा

**मञ्जूषायां प्रदत्तशब्दानां सहायतया "भारतीय संस्कृतिः" इति विषयम् अधिकृत्य पञ्चवाक्यानि संस्कृतेन लिखत**

| |
|---|
| अन्तःकरणस्य अलंकरणम्, संस्कृतिः संस्कारेण जायते, भारतीया संस्कृतिः, विश्वे सर्वोच्च स्थानं धारयति, ज्ञानवर्धिका, महापुरुषाणां ऋषीणाञ्च जीवनीशक्तिः, आत्मनः शोभा, जीवनमूल्यस्य रक्षणं, परोपकारिका |

## खण्ड – ग (अनुप्रयुक्तव्याकरणम् – 25 अङ्काः)

**प्र.4 - अधोलिखितानां प्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत–** (1x3=3)

(i) 'ऋ' वर्णस्य उच्चारणस्थानं किम् अस्ति ?

(ii) 'सम्राट्' इति पदे नासिकावर्णं लिखत्।

(iii) 'गणितम्' इति पदे तालव्यं वर्णं लिखत।

**प्र. 5 रिक्तस्थानं पूरयत -** (1x2=2)

(i) ज्ञानम् - ज्+.........+आ+न्+अ+म्।

(ii) व्+इ+द्+व्+आ+न्+स्+अः = .........................।

**प्र.6 - अधोलिखितवाक्येषु रेखांकितपदानां समुचितं सन्धिं विच्छेदं वा कृत्वा लिखत–** (1x4=4)

(i) अद्य खल्ववगच्छामि पित्रा मे दुष्करं कृतम्।

(ii) अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।

(iii) तस्य मुखादमृतं वचः श्रोतुम् जनाः आगच्छन्ति।

(iv) भवान् निर् + रसं जलं किमर्थं पिबति ?

**प्र.7 - प्रदत्तविकल्पेभ्यः उचितं शब्दरूपं चित्वा रिक्तस्थानानि पूरयत–** (1x4=4)

(i) वटस्य पत्रस्य पुटे शयानं बालं...................मनसा नमामि।(मुकुन्द)

(ii) श्रीरामस्य ...............मातरः आसन्।(त्रि)

(iii) ......................... विश्वसेत।(आत्मन्)

(iv) ...................... कक्षायाम् बालिकाः पठन्ति।

(अ) इमाम् (ब) इमस्याम् (स) अस्याम् (द) अस्याः

**प्र.8 - प्रदत्तविकल्पेभ्यः उचितं धातुरूपाणि चित्वा रिक्तस्थानानि पूरयत–** (1x4=4)

(i) गायिकाः गीतानि.........................। (गै-लृट्)

(ii) सः यशः ...................................। (प्र+आप् - लट्)

(iii) चिकित्सकाः रुग्णान् ................। (सेव - लोट्लकारे)

(iv) मह्यम् मोदकानि ..................।

(अ) रोचति (ब) रोचन्ते (स) रोचन्ति (द) रुचन्ति

**प्र.9 - कोष्ठके प्रदत्तशब्दस्य उचितविभक्तिरूपेण वाक्यानि पूरयत–** (1x4=4)

(i) भक्ताः कथयन्ति................स्वाहा। (सरस्वती)

(ii) सः ................ श्रेष्ठतमः विद्यते। (छात्र)

(iii) अलम् मिथ्या..........................। (भाषण)

(iv) ................ पृष्ठतः सूर्यप्रतिमा विद्यते। (रथ)

**प्र.10 - रेखांकितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा रिक्तस्थानानि पूरयत–** (1x4=4)

(i) सर्वां वार्तां ज्ञातुम् (.............+............) कौशलः अपृच्छत्।

(ii) पाठम् अधि+ई+ल्यप् (..................) शयनम् कुरु।

(iii) निपुणं निर्+ईक्ष+ल्यप् (................) पठति।

(iv) सः भोजनं कृत्वा (..............+...................) आगच्छति।

## खण्ड – घ (पठितावबोधनम् – 30 अङ्काः)

**प्र.11 - (अ) अधोलिखितम् गद्यांशम् पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

"इह खलु पञ्चेन्द्रियाणि, पञ्चेन्द्रियद्रव्याणि, पञ्चेन्द्रियार्थाः च भवन्ति। तत्र चक्षुः श्रोत्रं घ्राणं जिहवा त्वक् च इति पञ्चेन्द्रियाणि। पञ्चेन्द्रियद्रव्याणि खं वायुः ज्योतिः आपो भूः इति। पञ्चेन्द्रियार्थाः शब्दस्पर्शरूपरसगन्धाः। मनःपुरःसराणि च इन्द्रियाणि अर्थसंग्रहसमर्थानि भवन्ति। न इन्द्रियवशगः स्यात्। न चञ्चलं मनः अनुभ्रामयेत्।

गुरु-वृद्ध-आचार्यान् अर्चयेत् ।

**(I)** **एकपदेन उत्तरत –** (1x2=2)

(i) कीदृशानि इन्द्रियाणि अर्थसंग्रहसमर्थानि भवन्ति ?

(ii) गुरु-वृद्ध-आचार्यान् अर्चयेत् । अत्र किम् जीवनमूल्यम् दत्तम् ?

**(II)** **पूर्णवाक्येन उत्तरत –**

इन्द्रियाणां द्रव्याणि कानि सन्ति ? (2x1=2)

**(III)** **निर्देशानुसारं उत्तरत –**

(i) 'नेत्रम्' इति पदस्य किम् पर्यायपदम् अत्र प्रयुक्तम् ? (1/2x4=2)

(अ) आपः (ब) चक्षुः
(स) घ्राणं (द) त्वक्

(ii) 'चञ्चलम्' इत्यस्य विशेषणपदस्य विशेष्यपदं किम् ?

(अ) इन्द्रियाणि (ब) मनः
(स) द्रव्याणि (द) ज्योतिः

(iii) ' अस्मिन् संसारे' इत्यस्य अर्थे अनुच्छेदे किम् अव्ययपदं लिखितम् ?

(अ) खलु (ब) इति
(स) तत्र (द) इह

(iv) अनुच्छेदे 'इन्द्रियाणि' इति कर्तृपदस्य क्रियापदं किम् ?

(अ) स्यात् (ब) इति
(स) अनुभ्रामयेत् (द) भवन्ति

**(ब) अधोलिखितम् पद्यांशम् पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

विन्ध्यसह्याद्रिनीलाद्रिमालान्वितं शुभ्रहैमाद्रिहासप्रभापूरितम्।
अर्बुदारावलीश्रेणिसम्पूजितम्। भूतले भाति मे अनारतं भारतम्।।
जाहृवीचन्द्र भागाजलैः पावितम्। भानुजानर्मदावीचिभिर्लालितम्।
तुङ्भद्राविपाशादिभिर्भालितम्। भूतले भाति मे अनारतं भारतम्।।

**(I)** **एकपदेन उत्तरत –**

(i) भारतं काभिः अन्वितं वर्त्तते ? (1x2=2)

(ii) भारतम् काभिः लालितम् अस्ति ?

**(II)** **पूर्णवाक्येन उत्तरत –** (2x1=2)

भारतम् कासाम् नदीनाम् जलैः पावितम् अस्ति?

**(III)** **निर्देशानुसारं उत्तरत –** (1/2x4=2)

**(i)**'निरन्तरम् इति अर्थे किम् पदम् प्रयुक्तम् ?

**(a)** पावितम् **(b)** सम्पूजितम् **(c)** अनारतं **(d)** भूतले

**(ii)** 'भानुजा' इति कस्याः नद्याः नाम अस्ति।

**(a)** यमुनायाः **(b)** गङ्गायाः **(c)** **चेनाब**नद्याः **(d)** सतलुजनद्याः

**(iii)** 'पृथिव्याम्' इत्यस्य पदस्य कः पर्यायः श्लोके लिखितः ?

**(a)** अर्बुद **(b)** भाति **(c)** भारतम् **(d)** भूतले

**(iv)** ''जलैः'' शब्दस्य विभक्तिवचनम् लिखत् ।

**(स) अधोलिखितम् नाट्यांशम् पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

प्रताप : श्रुतपूर्व इव स्वरः। (सैनिकं प्रति) वृक्षम् आरुह्य दृश्यतां कः एष शब्दापयति ?

सैनिक : (निपुणं निरीक्ष्य) महाराज! मेवाडमन्त्री भामाशाहः खलु एषः।

प्रताप : अये! भामाशाहः आगतः! कथमस्माकं दौर्भाग्यं भवतोअपि परिज्ञातम्।

**(भामाशाहः धनराशिमादाय आयाति)**

भामाशाह : (सप्रणामम्) आनन्दातः! सेवकं परित्यज्य कुत्र प्रस्थितो भवान् ?

प्रताप : (दीर्घ निःश्वस्य) न क्वापि बन्धो! गन्तुमपि न शक्यते। धनसेनयोः अभावे देशरक्षणाय पर्याकुलाः स्मः।

भामाशाह : भवतः चिन्तातुरतां परिज्ञाय भग्नमिव मे हृदयम्। (धनराशिं निर्दिश्य) इयं सम्पत्तिः खलु कस्मै प्रयोजनाय ? ईदृशे एव कर्मणि अस्यणः उपयोगः श्रेयान्।

प्रताप : सत्यं वदति भवान्।

भामाशाहः यद्येवं तर्हि गृहाताम्। त्रोट्यतां पारतन्त्रय श्रृडखलाः स्वकीयैः लौहबाहुभिः। स्वतंत्रः क्रियतां स्वदेशः। **(धनराशि प्रतापचरणयोः अर्पयति)**

प्रताप : (साश्चर्यम्) किमिदं भवान् करोति। नाहं दत्तां सम्पत्तिं पुनः आदद्मि।

भामाशाहः (सविनयम्) गृहातां भगवन्! देशं धर्म च रक्षितुम्।

प्रताप : धन्योऽसि मन्त्रिवर्य! त्वदीया जननी धन्या। सुकुले जातोऽसि।

**(I)** **एकपदेन उत्तरत –**

(i) धनराशिमादाय कः आगच्छति?

(ii) पारतन्त्रयश्रृड्खलाः काभिः त्रोट्यताम? (1x2=2)

**(II)** **पूर्णवाक्येन उत्तरत –**

प्रतापस्य चिन्तातुरताम् परिज्ञाय कस्य हृदयं भग्नमिव अभवत? (2x1=2)

**(III)** **यथानिर्देशं उत्तरत –**

(i) दत्तां ’ इति विशेषणस्य कः विशेष्यः अत्र प्रयुक्तः ?

**(ii)** ‘यद्येवं’ इति पदस्य **सन्धिच्छेदम्** किम् ? (1/2x4=2)

**(iii)** ‘जनकः’ इति अर्थे कः विपर्ययः प्रयुक्तः ?

**(iv)** ‘ गन्तुमपि ’ पदे कः प्रत्ययः अत्र प्रयुक्तः ?

प्र.12 - **रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत –** (1x4=4)

(i) <u>पर्युषितम्</u> अन्नम् न खादेत् ।

(ii) <u>नवाम्बुभिः</u> भूरि विलम्बिनो घनाः ।

(iii) भारतीयविज्ञानं <u>सर्वहिताय</u> आसीत् |

(iv) **<u>बोधायनाचार्येण</u>** शुल्वसूत्रेषु पाइथागोरसप्रमेयः पूर्वमेव निरुपितः।

प्र.13 - **निम्नलिखितश्लोकयोः अन्वयं मञ्जूषातः समुचितपदं चित्वा पूरयत-** (1/2x8=4)

| |
|---|
| अर्जितम्, मह्यं, तस्मै , अचिरेण, पदार्थज्ञानार्थम, संचितम्, वदतु, कालेन, |

(क) **स्नेहं ददाति यो मह्यं नित्यं तस्मै ददाम्यहम् ।ज्योतिः पदार्थज्ञानार्थं कोऽहं वदतु साम्प्रतम्॥**

**अन्वयः** – यः (१)............ स्नेहं ददाति (२).............अहं नित्यं (३)............. ज्योतिः ददामि । साम्प्रतम् (४)............. अहम् कः अस्मि ?

(ख) सुचिरेणापि कालेन यशः किञ्चिन्मयार्जितम् ।
अचिरेणैव कालेन भरतेनाद्य संचितम् ॥

**अन्वयः –** मया सुचिरेण अपि............(५)..........किञ्चित् यशः..........(६)...........(परं) अद्य भरतेन........(७)............अपि कालेन (यशः) .............(८).............।

प्र.14 - **(I)** **प्रसंगानुसारम् रेखांकितपदानाम् उचितम् अर्थं चित्वा लिखत–** (1x2=2)

(i) न धर्मवृद्धेषु **वयः** समीक्ष्यते।

अ) धनम् ब) वेषः स) कुलम् द) आयुः

(ii) अहं दानशीलतां **समाकर्ण्य** आगतोऽस्मि ।

अ) उक्त्वा ब) श्रुत्वा स) उपसृत्य द) आदाय

(1/2x4=2)

**(ii) शब्दानाम् अर्थैः सह मेलनं कुरुत–**

| | | |
|---|---|---|
| (i) | अणिम्नः | उदधिः |
| (ii) | उपसृत्य | सूक्ष्मात् |
| (iii) | पयोधिः | समीपं गत्वा |
| (iv) | घनाः | वारिदः |

***********